याज्ञ० वचनोक्तनिषिद्धभिन्ने २दानार्हे दत्तापदानिकशब्दे २४५५।५६ पृ० दृश्यम् ।

**देव** देवने भ्वा० आत्म० अक० सेट् । देवते अदेविष्ट । अदेविढ्म् अदेवि(ढ्व)ध्वम् दिदेवे अदिदेवत् । देवयति ते अदिदेवत् त । देवनमिह रोदनमिति भट्टमल्लः । परि+विलापे । "विलापः परिदेवनम्" अमरः । "खरदूषणयोर्भ्रात्रोः पर्य्यदेविष्ट सा पुरः" भट्टिः ।

**देव** पु० दिव–अच् । १अमरे सुरे नाट्योक्तौ २राजनि अमरः । ३नृपे ४मेघे पु० ५इन्द्रिये न० मेदिनि० ६पारदे पु० राजनि० । ७ब्राह्मणानामुपाधिभेदे "ततश्च नाम कुर्वीत पितैव दशमेऽहनि । देवपूर्वं नराख्यं हि शर्मवर्मादि संयुतम्" इति भवि०पु० । "नरमाचष्टे इति नराख्यं नरनाम, देवात् पूर्वं तच्च विशिष्टं शर्मयुतम् । "शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः । भूतिगुप्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" इति यमवचने समुच्चयोपलब्धेः । "शर्मान्तं ब्राह्मणस्य स्यात्" इति शातातपीयेन शर्मान्तता च । ८देवदारुणि शब्दार्थचि० । ९पूज्ये १०दीप्ते च त्रि० ११परात्मनि पु० "एकोदेवः सर्वभूतेषु गूढः" श्रुतिः । "भर्गोदेवस्य" गायत्री "दीव्यते क्रीडते यस्मात् रोचते द्योतते दिवि । तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतैः" योगियाज्ञ० "उद्भवः क्षोभणो देवः" विष्णुसं० "यतः क्रीडति सर्गादिभिर्विजिगीषते शत्रून्, व्यवहरति सर्वभूतेषु आत्मतया, द्योतते स्तूयते स्तुत्यैः सर्वत्र गच्छतीति तस्मात् देवः" भा० । सुराश्च यद्यपि बहवस्तथापि प्राधान्यात् त्रयस्त्रिंशत्संख्यया त्रयस्त्रिंशत्पतिशब्दे ३३५८ पृ० दृश्याः तत्र सुरे "देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः" गीता । "देवानृषीन् मनुष्यांश्च पितॄन् गृह्याश्च देवताः" मनुः । नृपे "देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलम्" नैष० नाट्योक्तौ नृपे "यथाऽऽज्ञापयति देवः" भूरिनाटकेषु । मेघे देवो गर्जति देवगर्जनम् देवे वर्षति । "देवाश्च आजानदेवाः कर्मदेवाश्च" कर्मदेवशब्दे १७२८ पृ० दृश्यम् ।

**देवऋषभ** पु० नित्यकर्म० प्रकृतिवद्भावः । कश्यपकन्यायां धर्मस्य पत्नीभेदे भानौ जाते पुत्रे दशधर्मायेत्युपक्रमे "भानुर्लम्बा ककुब्जामिर्विश्वा साध्या मरुत्वती । वसुर्मुहूर्ता सङ्कल्पो धर्मपत्न्यः सुतान् शृणु । भानोस्तु देवऋषभ इन्द्रसेनस्ततो नृप !" भा० ६।५।४५

**देवऋषि** पु० देवानामृषिः, पूज्यत्वात् प्रकृतिवद्भावो वा । देवर्षौ नारदादौ "अथ देवऋषी राजन् ! संपरेतं नृपात्मजम्" भाग० ६।१६।१ पक्षे देवर्षिरप्यत्र । "इहस्ततेष्ट कृत्कीर्त्तेर्देवर्षेर्विद्धि भारत" भा०आ० ६७अ० ।

**देवक** त्रि० दिव–ण्वुल् । १क्रीडके २गन्धर्वपतिभेदे ३कृष्णस्य मातामहे आहुकपुत्रे नृपभेदे च पु० "यस्त्वासीद्देवको नाम देवराजसमद्युतिः । स गन्धर्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः" भा० आ०६७अ० तस्यैव देवकनाम्ना कलावतारः इत्यर्थः । "आहुकस्य तु काश्यायां द्वौ पुत्रौ सम्बभूवतुः । देवकश्चोग्रसेनश्च देवगर्भसमावुभौ । देवकस्याभवन् पुत्राश्चत्वारस्त्रिदशोपमाः । देववानुपदेवश्च सुदेवो देवरक्षितः । कुमार्यः सप्त चाप्यासन् वसुदेवाय ता ददौ । देवकी शान्तिदेवा च सुदेवा देवरक्षिता । वृकदेव्युपदेवी च सुनाम्नी चैव सप्तमी" हरिवं० ३८अ० । ४तत्कन्यायां स्त्री ङीष् । देवकीशब्दे दृश्यम्

**देवकर्दम** पु० देवप्रियः कर्दम इव । श्रीखण्डागुरुकर्पूरकुङ्कुमैर्मिलितैः कृते कर्दमरूपे गन्धद्रव्यभेदे राजनि० ।

**देवकात्मजा** स्त्री ६त० । देवकनृपसुतायां देवक्यां प्राधान्यात् शब्दरत्ना० ।

**देवकार्य** न० देवप्रियार्थं कार्यम् । १देवप्रियार्थे होमपूजादौ कार्ये "देवकार्यात् द्विजातीनां पितृकार्यं विशिष्यते" मनुः । देवानामभिलषितं कार्यम् । २देवाभिलषिते कार्ये च "अनुष्ठितदेवकार्यम्" रघुः कृतरावणवधादिरूपदेवकार्यमित्यर्थः । देवकर्मादयोऽप्यत्र "देवकर्मकृतश्चैव युक्ताः कामेन कर्मसु" भा०शा०१६७अ०

**देवकाष्ठ** न० देवप्रियं काष्ठमस्य । देवदारुवृक्षे रत्ना० । "मनःशिला देवकाष्ठं रजन्यौ त्रिफलोषणम्" सुश्रु० ।

**देवकिरी** स्त्री मेघरागस्य भार्य्याभेदे रागिणीभेदे तद्रागस्य रागिणीभेदाः तत्स्वरूपञ्च सङ्गीतदा०उक्तं यथा "ललिता मालती गौरी नाटी देवकिरी तथा । मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः" । अस्या स्वरूपं यथा "भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा । ख्याता देवकिरी ह्येषा करार्पितसखीकरा" देवगिरीति वा पाठः ।

**देवकिल्बिष** न० देवेन कृतं किल्बिषमनिष्टकर्म । देवकृते अनिष्टे कार्ये यथा वरुणकृतपाशबन्धनं यमकृतपादबन्धनमित्यादि । "मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । "अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषात्" ऋ०१०।९७।१६ ।

**देवकी** स्त्री देवक+पुंयोगे ङीष् पुंयोगस्य न केवल ग्रा-